தஞ்சாபுரீ மாகாத்மியம்

சரசுவதி மகால் நூலகம்,
தஞ்சாவூர்.

CC-0. Sarasvati Mahal Se[illegible] [illegible]ed by [illegible] Muthulaksh[illegible] [illegible]earc[illegible]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

Thanjavur Sarasvati Mahal Series No. 232

॥ तञ्जापुरीमाहात्म्यम् ॥

(विष्णुस्थलम्)

TANJAPURI MAHATMYAM

(VISHNUSTHALAM)

(Sanskrit Text with Tamil Translation)

Edited by
Sahitya Siromani

Tirumati S. RAJALAKSHMI
Sanskrit Pandit (Rtd.),
Sarasvati Mahal Library, Thanjavur.

0232
Sarasvati Mahal Library. Thanjavur

THANJAVUR MAHARAJA SERFOJI'S

SARASVATI MAHAL LIBRARY AND RESEARCH CENTRE

THANJAVUR.

2015 Price: Rs.100-00

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

நூற்பதிப்பு விளக்கக் குறிப்பு

நூற்பெயர்	:	தஞ்சாபுரீ மாஹாத்மியம்
பதிப்பாசிரியர்	:	S. இராஜலக்ஷ்மி
வெளியிடுபவர்	:	இயக்குநர், சரசுவதி மகால் நூலகம், தஞ்சாவூர்.
வெளியீட்டு எண்.	:	232
மொழி	:	சம்ஸ்க்ருதம் & தமிழ்
பதிப்பு	:	இரண்டாம் பதிப்பு
வெளியீட்டு நாள்	:	2015
தாள்	:	TNPL 18.6 கி. கி
நூல் அளவு	:	21 x 14 செ. மீ.
பக்கங்கள்	:	80
படிகள்	:	500
எழுத்து	:	16 & 12 புள்ளி
அச்சிட்டோர்	:	ஒளி அச்சுகோப்பு மற்றும் காப்பி பிரிண்டர் அச்சு, சரசுவதி மகால் நூலகம்.
புத்தகக்கட்டு	:	மெலிந்த அட்டை
பொருள்	:	புராணம்
விலை	:	ரூ. 100-00

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

வெளியீட்டாளர் முகவுரை

தமிழ், தெலுங்கு, சமஸ்கிருதம், மராத்தி என பன்மொழிச் சுவடிகள் நிறைந்த கருத்துக் கருவூலமாகவும், அறிவுத் திருக்கோயிலாகவும் சரசுவதி மகால் நூலகம் தஞ்சையில் அமைந்து பன்னெடுங்காலமாக செயல்பட்டு வருகிறது. அதன்கண் அமைந்துள்ள அரிய சுவடிகளை நூல்களாக சிறப்பான முறையில் பதிப்பித்து வெளியிட்டு வருகின்றது. அவ்வரிசையில் **தஞ்சாபுரீ மாஹாத்மியம்** என்னும் இந்நூல் தற்போது இரண்டாம் பதிப்பாக வெளிவருகிறது.

காவிரி பாயும் தமிழ்நாடு கலைகளுக்கெல்லாம் தாய்வீடு என்பதற்குச் சான்றாக திகழ்வது சோழநாடு. சோழநாட்டின் பெருமைகளுக்குச் சிகரமாக விளங்குவது தஞ்சாவூர் ஆகும். இந்நகரில் அழகிற்கு அழகு செய்வது இராஜராஜ சோழனால் எழுப்பப் பெற்ற தஞ்சை இராஜராஜேஸ்வரம் என்று அழைக்கப்பெறும் பெரிய கோயில்ஆகும். இத்தகு சிறப்பு வாய்ந்த இவ்வூருக்கு தஞ்சாவூர் என்று பெயர் ஏற்பட காரணம் என்ன என்பதை ஒரு அருமையான புராணக் கதையின் வாயிலாகத் தெரிவிப்பதுதான் தஞ்சாபுரீ மாஹாத்மியம் என்னும் இந்நூலாகும்.

கிருத யுகத்தில் "மனு" என்ற மன்னர் அரசாண்டு வந்தார். அவரது மகன் சிறந்த விஷ்ணுபக்தன். ஒரு சமயம் ஒரு ரிஷி அவனைக் காணச் சென்றார். அவன் அவரை மதிக்கவில்லை. அதனால் தனது ஆச்சிரமத்திற்குத் திரும்பிவிட்டார். இதனையறிந்த மனு தனது மகனை அசுரனாகப் பிறக்கச் சபித்தார். மனுவின் மனைவி மிகவும் வருந்தி சாபம் தீர ஏதாவது வழியை தாங்களே அருள வேண்டும் என்று வேண்டினாள். அதனை ஏற்று

CC-0. SaTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

மனுவானவர், "உனது மகன் விஷ்ணுவினால் கொல்லப்பட்டு சிவலோகம் செல்வான்" என்று சமாதானம் கூறினார். அந்த விஷ்ணுபக்தன்தான் தஞ்சாசுரனாகப் பிறந்து விஷ்ணுவுடன் சண்டையிட்டு முக்தியடைந்ததால் தஞ்சாவூர் எனப்பெயர்பெற்றது.

இந்நூலை சிறப்பாகப் பதிப்பித்த இந்நூலக முன்னாள் சம்ஸ்க்ருதப் பண்டிதர் திருமதி S. இராஜலக்ஷ்மி அவர்களுக்கு என் பாராட்டுக்கள்.

இந்நூல் வெளிவரத் தேவையான நிதியுதவி நல்கிய அரசுக்கு என் மனமார்ந்த நன்றியைத் தெரிவித்துக் கொள்கிறேன்.

இந்நூல் நன்கு வெளிவர ஆவன செய்துள்ள சரசுவதி மகால் நூலக நிருவாக அலுவலர்(பொ.) திரு. ம. சங்கரநாராயணன், B.A., அவர்களுக்கும், நூலகர் முனைவர் எஸ்.சுதர்ஷன், M.A.,B.Lit.,M.L.I.S.Ph.D., அவர்களுக்கும் மற்றும் நூலகப்பணியாளர்களுக்கும் எனது பாராட்டுதல்களைத் தெரிவித்துக் கொள்கிறேன்.

இந்நூல் திருத்தலங்களைப்பற்றி ஆய்வு மேற்கொள்ளும் மாணவர்களுக்கும், சமஸ்கிருதமொழி ஆர்வலர்களுக்கும் பெரிதும் பயன்படும் என்பது திண்ணம்.

தஞ்சாவூர்
16-05-2015

டாக்டர் என். சுப்பையன், இ.ஆ.ப.,
மாவட்ட ஆட்சித்தலைவர் மற்றும் இயக்குநர்,
சரசுவதி மகால் நூலகம்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्रीः ॥

॥ ओं श्री वल्लभगणपतये नमः ॥

॥ प्रस्तावना ॥

❖❖❖

"ब्रह्माण्डपुराणोक्त तञ्जापुरीविष्णुस्थलमाहात्म्यम् विदितचरमेव यत् चोलसाम्राज्यधुरन्धराणां कलयाकलाचारेण च लोकविश्रुता 'तञ्जापुरी-नगरी' प्रधानराजधानी आसीदिति ॥

स्थलमाहात्म्यम् - अथवा क्षेत्रमाहात्म्यम् :-

द्राविडदेशे विद्यमानानि यानि क्षेत्राणि तानि सर्वाण्यपि तत्र तत्र अधिष्ठानं प्राप्तवतां देवतानां पुण्यनदीनां पावनानां तीर्थानां च प्रभावेनैव महात्म्यमावहन्ति लोकप्रसिद्धिं चाप्नुवन्ति । अपि च ज्ञानसंबन्धप्रभृतिभिः शैवसामयाचारिकैः नम्माल्वार प्रभृतिभि-र्वैष्णव सामयाचारिकैश्च प्रस्तूयमानानि तैस्तैश्च कृतैः प्रबन्धैस्स्तोत्रादिभिश्च परिशुद्धिमाप्त्वा पावनानि विख्यातानि च भवन्ति ।

प्राधान्येन यस्मिन्ग्रन्थे देवताप्रभावः स्थलतीर्थप्रभावश्च सविस्तरं विचारितं भवतितस्य ग्रन्थस्य क्षेत्रमाहात्म्यमथवा स्थलमाहात्म्यमिति प्रसिद्धिः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अस्मिन्पुस्तके विशेषत: तञ्जापुर्या: तादृशनामकरणस्य कारणं अस्यां अधिष्ठानं प्राप्तवतां नीलमेघ, नृसिंह वराहदेवतानां मणिमुक्ता-नद्या: अमृतपुष्करिण्याश्च माहात्म्यं प्रतिपाद्यने अत: अस्य "तञ्जापुरी-विष्णुस्थलमाहात्म्य" मिति प्रसिद्धि:

पराशरक्षेत्रमाहात्म्ये (B. 1866. D. 10357) धर्मभूपपुण्य-बन्धो: संवादे :-

कृतयुगे मनो: पुत्र: कश्चन मौनी विष्णुभक्तश्चासीत् । कदाचित् य: कश्चन मुनिश्रेष्ठ: तं द्रष्टुकाम: तत्समीपमागमत् । स मौनी तं मुनिं नोपचचार । तेन निर्विण्णो मुनिश्रेष्ठ: स्वाश्रममेव प्रत्यागच्छत् । इमं वृत्तान्तं ज्ञात्वा तस्य पिता मनु: स्वकुमारं 'असुरोभव' इति शशाप । परन्तु शापवृत्तान्तज्ञया मनो: पत्न्या प्रार्थितो मनु: "तवपुत्र: असुरो जनित्वा भूत्वा संग्रामे विष्णुना हत: शिवसायुज्यमवाप्नुयात्" इति शापविमोचनं च चकार । तथैव मनो: पुत्र: अस्यां पुर्यां जनित्वा तञ्जासुरनाम्ना लोकेषुविश्रुत: साधूनां तपस्विनां च बहूपाद्रवं कुर्वन्नासीत् । तपस्विभि: प्रार्थितो विष्णु: तं संग्रामे जघान । मोक्षसमये तेन प्रार्थितो भगवन्विष्णु:

"त्वन्नाम्ना पुरमेतत् प्रसिद्धिमभियास्यति"। इति वरं अदात् । अत: एव अस्या: पुर्या: तञ्जापुरीति प्रसिद्धि: । परमेश्वरस्य तञ्जेश: इति च ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नामान्तरम् :-

अस्याः पुर्याः विजयपुरी अलकापुरीती च प्रसिद्धिरासीदिति ज्ञायते ।

विजयपुरी :-

भविष्योत्तरपुराणे उत्तरखण्डे विजयपुरीमाहात्म्ये
एवं प्रस्तूयते :—

देवासुरयुद्धे असुरैः पराजिताः देवाः अस्यां पुर्यां शमीवृक्षस्य मूले अधिष्ठानं प्राप्तवन्तं परमेश्वरं प्रणम्य बहुधा तुष्टुवु । तेन प्रसन्नो भगवानाविरासीत् परमेश्वरः च तानाश्वास्य पुनः असुरान्जेतुं वरमदात् । तेन ते च सुराः असुरानजयन् । अतः अस्या विजयपुरीति प्रसिद्धिः । इति

अलकापुरी :-

कदाचित् अस्यां नगर्यां कुबेरः परमेश्वरप्रसादमुद्दिश्य तपश्चचार । तेन प्रसन्नो भगवान्परमेश्वरः कुबेरप्रार्थनामङ्गीकृत्य -

त्वन्नाम्नापु पुरमेतत्तु प्रसिद्धिमभियास्यति
दक्षिणालकापुरीत्येव सर्वलोकेषुविश्रुता ॥

इति वरमदात् ॥ अतः अस्याः अलकापुरीति च प्रसिद्धिः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नीलमेघस्वतारः - तीर्थमहिमा च -

कदाचित् पराशरो नाम मुनिः तपसः योग्यं स्थलं विचिन्वन्नस्यांपुर्यां प्रवहंतीं मणिमुक्तानदीं प्राप्य तत्समीपस्थे उपवने एव शिष्यैस्साकं वसन् तपः कुर्वन्नासीत् । अथ कदाचित् पुरुषोत्तमः श्रीमन्नारायणः देवार्थं पयोधिं मन्थनं कृत्वा अमृतं प्राप्य देवेभ्यः मुनिभ्यश्चैव केवलमदात् । मन्थने अत्यन्तं साहाय्यं कृतवद्भ्यः असुरेभ्यः तु न ददौ तेन कुपिताः असुराः योद्धुमारभन्त । अस्मिन्नवसरे पराशरस्तु लोकोपकारार्थं महाविष्णोः सकाशात् अमृतं गृहीत्वा देवेन्द्रकृतान्तरायमपि हरिपदहृढभक्त्या संतार्य भूलोकमागत्य अस्यां पुर्यां प्रवहन्त्यां मणिमुक्तानद्यां न्यक्षिपत् । ततः प्रभृति तस्याः नद्याः अमृतपुष्करिणीति च प्रसिद्धिः तत्समीपस्थसरसश्च सा प्रसिद्धिः संबभूव अथ कदाचित् निदाघार्ताः क्षुत्पिपासार्दिताः शाल्मलीद्वीपवासिनः तञ्जको दण्डकः तारकश्चेति विश्रुताः महावीराः असुराः ।

सदारसुतभृत्यबलवाहनाः भूमावटन्तः दूरात् प्रहृष्टजनसंकीर्णं फलमूलोपशोभितं ।पराशरतपोवनं दृष्ट्वा परं विस्मयमागताः तत्रागच्छन् तत्र फलानि भुक्त्वा रसवत्तरं अमृतोपमं अमृतपुष्करिणीजलञ्च पीत्वा तस्मिन्नेवाश्रमे वसन्तः आश्रमवासिनः तपोधनानन्यांश्च भृशं दूषयन्तः अतीव हिंसां च कुर्वन्तश्चासन् । तेषां तादृशीं हिंसामसहमानः पराशरः भगवन्तं पितामहं प्राप्य बहुधा स्तुति

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रवाहैः प्रीणयित्वा तञ्जकादिभिः कृतोपद्रवान्प्रोवाच तत्प्रतीकारञ्च कर्तुमयाचत । स च पितामहः परमेश्वरं अभ्यर्थयितुं मयोचत् । पराशरश्च परमेश्वरं प्रति तपश्चचार ।

तेन प्रसन्नो भगवान् तत्र आविर्भूय पराशरमुखात् तञ्जकादीनां दौष्ट्यं ज्ञात्वा तान्हन्तुं चण्डिकां आज्ञापयामास चण्डिका च भगवतः परमेश्वरस्याज्ञां अभ्युपेत्य तञ्जकादिभिस्साकं महद्युद्धमकरोत् । तां चण्डिकां प्रति योद्धुमशक्ताः तञ्जकादयः अमृतपुष्करिणीं गत्वा श्रमापनयनाय अमृतांबु च पीत्वा तेन पुनः सहस्रकृत्वः प्रवृद्धबल-सम्पन्नाः तया देव्या चण्डिकया साकं योद्धुमागत्य तुमुलं घोष-मुत्पादयन्तः युद्धायागन्तुं उद्घोषयामासुः ॥

तेन प्रकुपिता चण्डी पुनरागत्य तान्हन्तुमारभत परन्तु अमृतपयः पानेन अत्यधिकं बलन्वितान्तान्हन्तुमशक्ता तस्य किं कारणं भवेदित्यालोच्य अन्ते अमृतपयःपानेनैव इमे एवं बलिष्ठाः भवन्ति इति ज्ञात्वा पराशरमाहूय तञ्जकादीनामवध्यत्वकारणमुक्त्वा महाविष्णुमाराधयितुमाज्ञापयामास । स च भगवन्तं पुरुषोत्तमं तपसाराध्य तञ्जकादिकृतमहदुपद्रवांश्चोक्त्वा तान्हन्तुमयाचत । भगवान्पुरुषोत्तमश्च तत्प्रार्थनामङ्गीकृत्य पराशरप्रभृतीन्साधून् अनुग्रहीतु नीलमेघनिभः अस्यां पुर्यामाविर्भूय नृसिहत्वं चोपादाय तञ्जकादीनसुरान् जघान । तञ्जकश्च मोक्षकाले स्वहन्तारं नृसिंहरूपिणं भगवन्तं हरिं ज्ञात्वा प्रार्थयामास यथा -

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

"नारसिंहमिदं रूपं मदर्थं च त्वयाश्रुतम् ।
अतोऽनेनैव रूपेण अपवेष्टुमिहार्हसि ॥
किञ्चेयं नगरी पुण्या प्रथितास्तु समाख्यया" ॥ इति

भगवान्विष्णुश्च तत्प्रार्थनामङ्गीकृत्य तथैव भवेदिति वरमदात् । ततः प्रभृति अस्याः नगर्याः तञ्जापुरीति प्रसिद्धिः । भगवता पुरुषोत्तमेन हतं तञ्जकं ज्ञात्वा दण्डको भयविह्वलः हस्ताभ्यां भुवं विभिद्य अन्तः प्रविश्य द्रुतं ययौ तत्ज्ञात्वा भगवान्पुरुषोत्तमश्च वाराहं वपुरास्थाय तमनुद्रुत्य जघान । अन्ते तस्मै प्रतिश्रुतवरः भगवान्-विष्णुः अस्यां वराहरूपेणैवास्ते ॥ विष्णुना चोदिता देवी चण्डिका तारकासुरं जघान ॥

पराशरश्च धर्मात्मा प्रणम्य शिरसा हरिः ब्रह्माणं शङ्करश्चान्यान् यथार्हं संपूजयन् । अस्यां नगर्यां नीलमेघं श्रिया सार्धं प्रतिष्ठाय आराधयामास । तञ्जकाय प्रतिश्रुतवरः भगवान्विष्णुः अद्यापि श्रिय सार्धं नीलमेघाख्यः विराजते तथा नृसिंहवराहाख्यश्च विराजते" इति ॥

मातृका :-

लोकप्रसिद्धिमागतेऽस्मिन्सरस्वतीमहालाख्य भाण्डागारे संरक्षितासु मातृकासु अन्यतमां B. 1836, D. 10480 अंकाङ्कितां मातृका-माश्रित्य इयंमुद्रिता ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कृतज्ञतानिवेदनम् :-

ग्रन्थमिमं मुद्रयितुं मां प्रेरितवतीभ्यः भूतपूर्वमण्डलाध्यक्षपदमलंकुर्वतीभ्यः **श्रीमती शोशम्मा,** I. A. S., महाशयाभ्यः, तथा **टी. आर्. रामस्वामि,** I. A. S., महोदयेभ्यश्च, तथा मां प्रोत्साहितवद्भ्यः निर्वाहकधुरंधरेभ्यः **श्री पश्चनादन्** M. A., B. Lib. Sc., महाशयेभ्यश्च मम कृतज्ञतां निवेदयामि सरस्वतीमहालयमुद्राक्षरशालाकर्मचारिभ्यः सर्वेभ्यश्च कृतज्ञतानिवेद्यते ॥

इत्थं

साहित्यशिरोमणिः

तञ्जावूर्

24—1—1986.

श्रीमती राजलक्ष्मी, संस्कृतपण्डितः

संपादकः.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

முகவுரை

'காவிரி பாயும் கன்னித் தமிழ்நாடு கலைகளுக்கெல்லாம் தாய்வீடு' என்ற கூற்று உண்மையென்று பகரச் சான்றாகத் திகழ்வது சோழநாடு. சோழநாட்டின் பெருமைகளுக்குச் சிகரமாக விளங்குவது தஞ்சாவூர் ஆகும்.

இவ்வூர் மிகவும் புகழ்பெற்ற சரித்திரப் பழமை வாய்ந்ததாகும். சோழர் வரலாற்றில் இவ்வூர் தனியான தொரு சிறப்பிடத்தைப் பெற்றுள்ளது எனலாம். விசயாலய சோழன், முதன் முதலாக 'முத்தரையர்' ஆட்சியில் இருந்த தமிழகத்தை கைப்பற்றித் தஞ்சையை தலைநகராக்கி, தன் வெற்றிக்கு அறிகுறியாக 'நிசும்பசூதனி' கோயிலைக்கட்டி, சோழர் ஆட்சியை மீட்டுக்கொணர்ந்தான் என வரலாறு கூறும். இதற்கு ஆதாரமாக அவனால் கட்டப்பெற்ற 'நிசும்பசூதனி' கோயில் இடிந்த நிலையில் இன்றும் தஞ்சைமாநகரில் (கிழக்குக் கோட்டைக்கு அருகில்) இருப் பதைக் காண முடிகிறது.

இத்தகு வரலாற்றுப் பின்னணியினை உடைய தஞ்சைமாநகர் விசயாலயன் வழிவந்த இராஜராஜசோழன் இவன் மகன் இராசேந்திர சோழன் காலத்தில் மேலும் புகழ்பெற்ற நிலையை அடைந்து தமிழ் நாட்டின் அன்றைய வரலாற்றுக்கும், இன்றைய வரலாற்றுக்கும் கட்டியங்கூறி நிற்கிறது எனலாம். 'தமிழ்நாட்டின் நெற்களஞ்சியம்' எனப் புகழப்படும் பெருமை வாய்ந்த இந்நகர் இன்று பலதரப்பட்ட பல்லாயிரக் கணக்கான மக்கள் வாழும் ஒரு சிறப்பினை உடையதாய் விளங்குகிறது. இந்நகரில் அழகிற்கு அழகு செய்வது இராஜராஜ சோழனால் எழுப்பப் பெற்ற ஓங்கி உயர்ந்த 'தஞ்சை இராஜராஜேஸ்வரம்' என்று அழைக்கப்பெறும் பெரிய கோயில் ஆகும்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இத்தகு சிறப்புவாய்ந்த இவ்வூருக்கு தஞ்சாவூர் என்று பெயர் ஏற்பட காரணம் என்ன என்பதை ஒரு அருமையான புராணக் கதையின் வாயிலாகத் தெரிவிப்பதுதான் 'தஞ்சபுரி மாஹாத்மியம்' என்னும் இந்நூலாகும்.

தல புராணம் என்பது மூர்த்தி, தலம், தீர்த்தம் என்ற மூன்றின் புகழைக் கூறுவது. தஞ்சையில் எழுந்த வைணவக் கோவில்களின் வரலாற்றை இப்புராணம் கூறுகின்றது. இதனையொட்டியே தற்போது அருள்பாலிக்கும் நீலமேகப் பெருமாள், நரசிம்மப் பெருமாள், வராகப்பெருமாள் ஆகியோர் தஞ்சையில் எழுந்தருளிய காரணத்தைக்கூறும் இந்நூலுக்குத் "தஞ்சபுரி (விஷ்ணுஸ்தல) மாஹாத்மியம்" என்று பெயர் வழங்கப்படுகிறது.

தஞ்சபுரி மாஹாத்மியம் என்னும் ஓலைச் சுவடியில் — தஞ்சையின் தலப் பெருமையை விளக்கும் புராணங்களில் (சுவடிகளில்) கூறியுள்ள முக்கியமான சில செய்திகளின் குறிப்பினை இங்கு கூறுவது பொருத்தமாகும்.

1) [1]அளகாபுரி மாஹாத்மியம் :

தேவர்களுக்கும், அசுரர்களுக்கும் யுத்தம் நடந்தது. தேவர்கள் தோல்வி அடைந்தார்கள், சமீ விருட்சத்தினடியில் வீற்றிருக்கிற பரமசிவனை வழிபட்டு அவர் அருளால் அசுரர்களை வென்றார்கள். அதனால் இந்த க்ஷேத்திரத்திற்கு **விஜயபுரம்** எனப் பெயர் ஏற்பட்டது.

குபேரனுக்கு பரமசிவன் வரமளித்தது. குபேரனது வேண்டுகோளுக்கிணங்க [2]**அளகாபுரி** என வழங்கலாயிற்று.

---

1) B-1838 D-10042

2) சிவக்கொழுந்து தேசிகர் பிரபந்தங்கள். Page 211. அளகை என்னும் பெயர் குலோத்துங்க சோழன் கோவையிற்பலவிடத்து வந்துள்ளது, "அத்தாரு நேருங் குலோத்துங்க சோழ னளகை வெற்பில் அளகாபுரிமன் குலோத்துங்கன்"

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

[1]தஞ்சாகரனது வேண்டுகோளுக்கிணங்க இவ்வூருக்குத் **தஞ்சாவூர்** என்றும். ஸ்வாமிக்கு **தஞ்சேச்வரர்** என்றும் வழங்கப்படுகிறது.

அமிர்தபுஷ்கரிணி எப்பொழுது வெட்டப்பட்டது என்பதை சூத முனிவருக்குச் சொல்கிறார். ஒரு சமயம் புதைத்து வைக்கப்பட்ட அமிர்த கலசத்தை எடுத்துப் பார்த்தபொழுது அது இறுகிக் கெட்டியாகி இருந்தது. அதையே லிங்கமாகச் செய்தார். தீர்த்தத்தையும் உண்டாக்கினார். அதனால் அந்த லிங்கத்திற்கு அமிர்தேச் வரர் என்றும், தீர்த்தத்திற்கு அமிர்தபுஷ்கரிணி என்றும் பெயர் வழங்கலாயிற்று. இதைத் தொடர்ந்து எழுபத் தேழாவது அத்தியாயத்தில் தீர்த்தமாஹாத்மியமும் கூறப்பட்டுள்ளது.

2) பராசர க்ஷேத்ரமாஹாத்மியம்* :

தஞ்சாகரனின் தோற்றம் :

தர்மபூபன் புண்ணிய பந்துவிடம், மனுவின் சாபத்தால் தஞ்சாகரனை வத்தலனைப் பற்றிக் கூறவேண்டும் என்று கேட்க, புண்ணியபந்து பின்வருமாறு கூறுகிறார் :

கிருதயுகத்தில் மனுவுக்கு புத்திரன் ஒருவன் இருந்தான். அவன் சிறந்த விஷ்ணுபக்தன், மௌனவிரதம் கொள்பவன், ஒரு சமயம். ஒரு ரிஷி அவனைக் காணச் சென்றார்.

---

1) தஞ்சாகரன் புராணம் கர்ணபரம்பரையாக வழங்கப்பட்டது, என்பதற்கு திருமங்கையாழ்வார், பொய்கையாழ்வார் (8-ஆம் நூற்றாண்டு) ஆகியோரின் பாசுரங்களே சான்று.

*இந்நூலில் (B 1866, D 10357) 1) नृसिंह, 2) नीलमेघ 3) ग्रामदेवी, 4) अमृतेश्वर, 5) विघ्नेश्वर 6) पराशरागमनम् 7) तञ्जासुरवधनम्, 8) वरदानम्, 9) मणिमुक्ताप्रभावम् இவையன்றி தெரியவேணு மென்று தர்மபூபன் கேட்டுக்கொண்டதற்கு இணங்க पुण्यबन्धु சொல்வது முதலியன இந்நூலில் உள்ள விஷயங்களாகும்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

அப்புத்திரன் அவரை மதிக்கவில்லை. அதனால் தனது ஆச்சிரமத்திற்குத் திரும்பிவிட்டார். இதையறிந்த மனு தன் மகனை அசுரனாகப் பிறக்கச் சபித்தார். மனுவின் மனைவி மிகவும் வருந்தி சாபம் தீர ஏதாவது செய்யவேண்டுமென்று வேண்டிக்கொள்ள விஷ்ணுவினால் கொல்லப்பட்டு சிவலோகம் செல்வான் என்று சமாதானம் கூறினார். அந்த விஷ்ணுபக்தன் தான் தஞ்சாசுரனாகப் பிறந்து விஷ்ணுவுடன் சண்டையிட்டு முக்தி அடைந்ததால் தஞ்சாவூர் எனப் பெயர்ப்பெற்றது.

மணிமுக்தா நதி மாஹாத்மியம்* :

சிவசோழனுக்கு மணிமுக்தா நதியின் பெருமையை 'புண்ணியபந்து' கூறுகிறார். அதில் 'ரிக்தன்' என்ற பிராமணனின் தவத்திற்கு மகிழ்ந்து ஸ்ரீலக்ஷ்மி மணி முத்துக்கள் பதித்த ஆபரணங்களணிந்து கொண்டு அழகிய ரூபத்துடன் வெள்ளை யானையுடனும் வந்து பிராமணனைக் கண்டு வேண்டும் வரத்தைக் கேட்கச் சொன்னாள். பிராமணனும் தனக்குப் பொருள்கள் வேண்டும் என்று கேட்க அவ்வாறே 'ரத்னகலசத்தைக்' கொடுத்து விட்டு நதிரூபமாய் மறைந்து விட்டாள். பரமசிவனது அருளினால் அந்நதியில் காவேரியும் சேர்ந்தாள். மணிமுக்தா நதியில் காவிரியின் சேர்க்கையும் இருப்பதால் இந்நதி மிகவும் புனித நதியாக ஆகின்றது. இந்நதிக் கரையில் சிரார்த்தம் முதலான வைதிகக் கர்மாக்களைச் செய்வது மிகவும் சிறப்புடையதாகக் கருதப்படுகிறது.

இந்நதியில் ஸ்நானம் செய்தால் லக்ஷ்மிதேவியின் கடாக்ஷத்திற்குப் பாத்திரமாவான். ரிக்தன் என்ற பிராமணன் தன் மனைவியுடன் மணிமுக்தா நதிக்கரையில் பிரதிதினம் விடியற்காலையில் ஸ்நானம்செய்து நியமத்துடன் இருந்து வந்தபோது லக்ஷ்மிதேவி ஒருநாள் இவன் முன்

---

*23-வது அத்தியாயம்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

தோன்றி பிராமணனே நியமத்துடன் இந்நதியில் நீராடி உனது காரியங்களைச் செய்து வா. இவ்விடம் உன்னை யண்டி பராசரர் முதலான பல ரிஷிகள் வருவார்கள், கங்கை முதலான தீர்த்தங்களும் இந்நதியோடு சங்கமமாவார்கள். நான் இங்கு ஹரியின் சந்நிதியிலிருக்கின்றேன். சூரியகிரஹணம், சந்திரகிரஹணம், சங்கராந்தி, காலங்களிலும், ஏகாதசி உபவாசமிருந்து மறுநாள் துவாதசி பாரணைக்கு முன் இந்நதியில் ஸ்நானம் செய்துவிட்டு பாரணை செய்பவர்கள் மோக்ஷத்தை அடைகிறார்கள் என்று கூறி மறைந்தாள்.

இதனைத் தொடர்ந்த அத்தியாயங்களில் நீராடும் முறையை வரிசைப் படுத்தி கூறுகிறது. அதில் முதலில் மணிமுக்தா நதியிலும் (வடவாறு) அமிர்த தீர்த்தத்திலும் கச்யப தீர்த்தத்திலும், அத்ரி தீர்த்தத்திலும், கிருஷ்ண காவேரி சங்கமத்திலும், பரத்வாஜ தீர்த்தத்திலும், விச்வாமித்ர தீர்த்தத்திலும், பின்பு லக்ஷ்மி தீர்த்தம், லோகபால தீர்த்தம், ஸப்தகன்யா தீர்த்தம் கஜேந்திர தீர்த்தம் இவைகளில் நீராடிப் பின்பு நீலமேகப்பெருமாள், முதலான விஷ்ணுமூர்த்திகளையும் வசிஷ்டேச்வரர் முதலான சிவமூர்த்திகளையும் வணங்கவேண்டும் என்ற முறையையும் கூறுகிறது.

3) பிருஹதீஸ்வர மாகாத்மியம்* :

குலோத்துங்கன் 'சமீவனம்' என்ற இடத்தைக் கண்டு களித்தான். இவ்விடத்தில் ஸ்ரீ பரமேச்வரன் குபேரனுக்கு காக்ஷியளித்து அவனுக்கு நன்மை பலவற்றை செய்திருக்கிறார். 'அன்றியும் இவ்விடத்தில் பராசரமுனிவர் பரம சிவனுடைய பெருமையை நன்குணர்ந்து அவரது அருள் பெற வேண்டுமென்றே மிக்க அன்புடன் பரமசிவனைத் தவத்தினால் ஆராதித்து வந்தார். இவ்விடத்தில்

---

*Ms. No. D. 10050 B. 1849

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ஆனந்தவல்லி என்ற அம்மன் தஞ்சாசுரனை ஜயித்தாள். தஞ்சாசுரனுடன் போர்புரியும்பொழுது அஷ்டமஹா சக்திகளும் எட்டு திக்குகளிலும் நின்று, அம்பாளுக்கு உதவி செய்திருக்கிறார்கள். அவர்கள் ஏகவீரா (2) ஜயந்தி (3) மர்தினி (4) மஹிஷாசுரமர்த்தினி (5) மாரி (6) ரேணுகா (7) காளி (8) கோமடீ என்ற இந்த எட்டு சக்திகளும் நான்குபுறமும் இருந்து உதவி செய்கின்றனர். அவ்விதம் அவர்களின் உதவியை அடைந்து ஸ்ரீ அம்பாள் தஞ்சாசுரனை சூலாயுதத்தால் ஜயித்தாள். தஞ்சாசுரன் மரணம் அடையும் சமயத்தில் அம்பிகையின் தரிசனத்தினால் நல்லெண்ணம் அவனுக்குத் தோன்றியது. அப்போது அம்பிகையைப் பார்த்து "தாயே! தங்கள் கையினால் எனக்கு மரணம் நேர்ந்தது. எனது பாக்கியம். தங்கள் காக்ஷியினால் எனது மனதின் அபூர்த்தி நீங்கி மிகத் தெளிவை அடைந்து மிகப்பெரும் பதவியைப் பெற்றிருக்கிறேன். இந்நகரத்திற்கு எனது பெயரால் 'தஞ்சாபுரி' என்ற பெயரிலேயே அழைக்கப்படவேண்டும். அப்போது தான் எனது பெயர் இப்பூமியிலும் நீடித்திருக்கும்" என வேண்டினான். அவனது விருப்பத்திற்கிணங்க இவ்விடத்திற்கு தஞ்சாபுரம் எனப் பெயரிட்டாள்.

தீர்த்தம் :

இவ்விடத்திலேயே வசிஷ்டர் பரமசிவனை வழிபட்டு இருக்கிறார். இவ்வாலயத்திற்கு வடகிழக்கில் **வசிஷ்ட தீர்த்தம்** இருக்கிறது. அத்தீர்த்தமானது வசிஷ்டரால் ஆதரிக்கப்பட்டு இருப்பதினாலே அதற்கு அப்பெயர் வரப் பெற்றிருக்கிறது. பரமசிவனுக்கு தென்புறத்தில் **தேவியுடன் வைத்யநாதனும்** எழுந்தருளி அருள்பாலிக்கின்றார். இதற்கு வடமேற்கு மூலையில் தேவ தீர்த்தம் என்று ஒன்று இருக்கிறது. அதில் பக்தியுடன் ஸ்நானம் செய்பவர்களுடைய எண்ணங்கள் நிறைவேறுகின்றன. அதன் அருகில் **மகாதேவியாரோடு நாகலேஸ்வரர்** இருக்கின்றார். இதன் மேற்கு புறத்தில் பரமசிவன் கொங்கணேசனுக்கு காக்ஷியளித்தருளினார். கொங்கணேசன் ஸ்ரீ பரமேஸ்வரனைப்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

பார்வதிதேவியாருடன் காக்ஷி கொடுத்தருளியதைக் கண்டு களித்து மிக நன்றி பாராட்டி அதற்கென்று ஆலயத்தை அமைத்திருக்கின்றார். அதை மிக அழகாய் மேன்மேலும் குலோத்துங்கன் விருத்தி செய்து இருக்கிறான். அன்றியும் குலோத்துங்கன் **ஆனந்தவல்லி உடனுறை தஞ்சபுரீஸ்வரருக்கு** கோபுரங்களையும் பிரகாரங்களையும் கட்டுவித்தான். சுதா புஷ்கரிணி (ஐயங்குளம்) என்ற பொய்கையையும் உண்டாக்கினான்.

4) தஞ்சை வெள்ளை பிள்ளையார் துவைஞ்சி :

தஞ்சைநகரில் கோவில்கொண்டுள்ள விஷ்ணு ஆலயங்களைப்பற்றி கீழேகாணும் பாடல்கள் நமக்கு உணர்த்துகின்றன :—

*கோபாலப்பெருமாள் சிங்கப்பெருமாள் மணிகுன்டப்பெருமாள்
மின்மலை வெங்கடேசர் ரகுநாதப்பெருமாள் ஆதிகேசவப்பெருமாள்
முகப்பிலாறுமுகப்பெருமாள் கருடங்கோட்டை மேலகோதண்டப் பெருமாள்
தாழியான் நிலமேகன் விதனமேபோக்குந் தஞ்சை நரசிங்கப்பெருமாள்
ஏனையோருந் தஞ்சை வெள்ளை பிள்ளையார்குற
வந்திக்குமுன்னடக்கவேணும்

கோபாலப்பெருமாள் :

தஞ்சை வடக்குவாயிலின் தெற்கேயுள்ள இராச கோபாலசுவாமி கோயிலில் உள்ள பெருமாள்.

சிங்கப்பெருமாள் :

தஞ்சை, விண்ணாற்றங்கரை, ஆனந்தவல்லியம்மன் கோயிலின் எதிரே எழுந்தருளி இருக்கின்றார்.

---

*சரசுவதிமகால் வெளியீடு ;

பதிப்பாசிரியர் புலவர் திரு வி. சொக்கலிங்கம் அவர்கள்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

*மணிகுன்றப்பெருமாள்

தஞ்சை கீழவீதி 'சர்க்கார்வாசல்' என்றழைக்கப்படும் சிறப்பு வாயிலுக்கு எதிரேயுள்ள நிலமிடற்றன்.

மின்மலை வெங்கடேசர் :

தஞ்சை ஐயங்கடைத் தெருவுக்கருகில் (திருப்பதியில் எழுந்தருளியுள்ளது போலவே) உயர்ந்த இடத்தில் மிகமிக உயரமான உருவத்தில் காட்சியளிக்கும் வெங்கடேசப் பெருமாள்.

ரகுநாதப்பெருமாள் :

தஞ்சை கீழக்கோட்டை வாயிலுக்கு மேற்கேயுள்ள கொண்டிராஜபாளையத்தில் வடக்கு நோக்கித் தோன்றுகின்ற இராமஸ்வாமிப் பெருமாள்.

ஆதிகேசவப்பெருமாள் :

இவர் முன் கூறிய வெங்கடேசப்பெருமாள் கோயிலின் தெற்குத் திருச்சுற்றில் எழுந்தருளியுள்ளார்.

முகப்பிளாறுமுகப்பெருமாள் :

வடக்கு வாயிலில் உள்ள சுப்பிரமணியக் கடவுள். (தஞ்சைக் கோட்டை கட்டிய பிறகு இக்கோட்டைக்குக் கிழக்கிலும், வடக்கிலும் மட்டுமே வாசல்கள் இருந்தனவாகவும், கிழக்கு வாயிலுக்குப் பிள்ளையாரைக் காவலாகவும், வடக்கு வாயிலுக்கு முருகனைக் காவலாகவும் வைத்ததாகக் கூறுவர்.)

---

*மணிகுன்றைப் பெருமாள் என்றும் வழங்குவர் (P-42) The Great Temple a Tanjore by T. M. S. No. 66) மணிபர்வதப்பெருமாள் என்பது சரியான பெயர் ஆகலாம். இக்கோயில் முன்னாளில் களிமேடு என்னும் ஊரில் கிழக்குப் பகுதியில் அமைந்திருந்ததாகவும், பின்னர் வின்னாற்றங்கரையில் புதிதாகக் கட்டப்பெற்றதாகவும் கூறுவர்.

தஞ்சை மராட்டியமன்னர் கால அரசியலும், சமுதாய வாழ்க்கையும் (பக்கம்—190)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

கருடக்கோட்டை :

தஞ்சாவூருக்குக் 'கருடக்கோட்டை' என்ற ஒரு பெயர் உண்டென்பர். இவ்வூர் ஒரு கருடப்பறவை உருவில் அமைக்கப்பட்டதென ஒரு காரணமும். 'இந்த கோட்டைக்குள் ஒருவருமே பாம்பு கடித்து இறந்ததில்லை. அப்படி இறக்க நேரிட்டாலும், தெய்வச் செயலாக அவர்கள் கோட்டைக்கு வெளியிலேயே சென்று இறப்பர்' என்று மறு காரணமும் கூறுவர். மேலும், 7–8-ஆம் நூற்றாண்டுகளில்தான் தஞ்சை நகரம் அமைக்கப்பெற்றதென்றும் அறிய முடிகிறது. சோழமன்னர்களுக்கு முன், தஞ்சையை ஆட்சி செலுத்தியவர்கள் முத்தரையர்கள். இளங்கோ முத்தரையருடன் போர்புரிந்த விஜயாலயனே பிற்காலச் சோழவரலாற்றின் முதல் நாயகன் என்பது சரித்திரம் கூறும் உண்மை. இக்காலத்தில் வல்லத்தில் அரண்மனை அமைந்து வல்லத்தையே தலைநகராகக்கொண்டிருந்தனர். வல்லத்தில் கட்டப்பட்ட கோட்டையே 'கருடக்கோட்டை' என்று கூறுவாருமுண்டு. மேலும் முத்தரையர் வரலாறு, திருவாலங்காட்டுச் செப்பேடு, கன்னியாகுமரிக் கல்வெட்டு ஆகியவற்றை ஒப்பு நோக்கினல் இவ்வூர் ஏழாம் நூற்றாண்டுக்குப் பிறகுதான் தஞ்சை நகரம் அமைக்கப்பெற்றுள்ளது. இக்கருத்தையே டாக்டர் திரு. த. கோ. பரமசிவம் அவர்களும் குறிப்பிடுகிருர்[1].

மேலகோதண்டப் பெருமாள் :

தஞ்சை ஐயன்கடைத் தெருவில் உள்ள பெருமாள் முற்கூறிய ரகுநாதப்பெருமாள் கோயிலின் மேற்கே இவர் இருப்பதாலும், பெருமாள் மேற்கு நோக்கி நிற்பதாலும், இவருக்கு "மேலகோதண்டப் பெருமாள்" எனப்பெயரிட்டார் போலும்.

---

1) தமிழ்ப்பொழில் — இதழ் எண் 59. மலர் 7 பக்கம் 328

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

தாழியான் :

தஞ்சை, மேலவீதி பங்காரு காமாட்சியம்மன் கோயிலின் வடக்கில் உள்ள கிருஷ்ணன் எனலாம். 'சகா நாயக்கன் வீதியில் உள்ள கிருஷ்ணன்' என்று கூறவும் இடமுண்டு.

நீலமேகன் :

முற்கூறிய வின்னாற்றங்கரைச் சிங்கப்பெருமாள் கோயிலின் மேற்கே வீற்றிருக்கின்றார் நீலமேகப்பெருமாள்.

நரசிங்கப்பெருமாள் :

இவர் முற்கூறிய கொண்டிராஜாபாளையம் ரகுநாதப் பெருமாளை நோக்கி அமர்ந்திருக்கின்றார். இவர் **சரித்திரப் புகழ்** படைத்தவர்.

தஞ்சையைப் பற்றிய முதல் குறிப்பைத் தருபவர், திருநாவுக்கரசர், 'தஞ்சை, தஞ்சைத் தளிக்குளத்தார்' (திருப்பதிகக்கோவை – திருவீழிமிழலைப் பதிகம்) என அவர் தமது தேவாரத்தில் குறிப்பிட்டுள்ளார்.

இதனையடுத்து, திருமங்கையாழ்வாரும் தஞ்சைக்கு மேற்கே 'வம்புலாஞ்சோலை' என்ற ஓர் மலர்க்காவைக் குறிப்பிடுகின்றார். (தற்போது–இப்பகுதி சேவப்பநாயக்கன் வாரிமுதல் நன் காட்டுப்பகுதி, வடவாற்றின் தென்கரை வரை இருந்தது.) ஆங்கு 'மாமணிக்கோயிலில் எழுந்தருளியிருந்தார் ஒரு சிங்கப்பெருமாள். இதனை 'எம்பிரான் எந்தை' என்று தொடங்கும் பாசுரத்தில் —

> "வம்புலாம் சோலை மாமதிள் தஞ்சை
> மாமணிக் கோயிலே வணங்கி"

என்று திருமங்கையாழ்வார் மங்களாசாசனம் செய்தருளியுள்ளதால் அறியலாம். அச்சிங்கப்பெருமாள் மேலச்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

சிங்கப்பெருமாள் என்றழைக்கப்பெறுவர். தஞ்சைக்குக் கிழக்கேயும் ஒரு சிங்கப்பெருமாள் எழுந்தருளி உள்ளார். இவரை 'கீழ்சிங்கப்பெருமாள்' என்றும் மேற்கே எழுந்தருளியுள்ள பெருமாளை 'மேலச் சிங்கப்பெருமாள்' என்பது மட்டுமின்றி மற்றோர் பெயர்க் காரணமும் உண்டு. கீழை வாயிலில் உள்ள சிங்கப்பெருமாளுக்கு கோரைப் பற்கள் கீழ்நோக்கியும், மேற்கே இருந்த சிங்கப்பெருமாளுக்குக் கோரைப்பற்கள் மேல்நோக்கியும் இருக்கின்ற காரணத்தால் இப்பெயர் எய்தியது என்றும் கூறுவர்.

இவ்வாறு வம்புலாஞ்சோலை (மேற்கு திசையில்) மாமதிள் தஞ்சை மாமணிக் கோயிலில் இருந்த சிங்கப் பெருமாளே காலச்சூழலில் தற்போது தஞ்சைக்கு வடக்கே இரண்டு கல் தொலைவில் *வெண்ணாற்றங்கரையில் கோயில் கொண்டெழுந்தருளியுள்ள சிங்கப்பெருமாள் என்று சரித்திர ஆய்வாளர்கள் கருதுகின்றனர்.

தஞ்சையின் மேற்குத் திசையில் எழுந்தருளி இருந்த சிங்கப்பெருமாளையே 8 ஆம் நூற்றாண்டில் வாழ்ந்த திருமங்கையாழ்வார் பாடியுள்ளார். காலப்போக்கில் இந்த ஆலயம் பழுதடைந்தமையால் இப்பெருமாளை வெண்ணாற்றங்கரையில் எழுந்தருளச் செய்துள்ளனர் என்பதை பின்வரும் குறிப்புகளால் அறியலாம்.

‡18-ஆம் நூற்றாண்டின் இறுதியில் (கி. பி. 1777-இல்) சில புதிய கோயில்கள் கட்டப்பெற்றன என்றறியப் பெறுகிறது. அவை நீலமேகப்பெருமாள், மணிகண்டப் பெருமாள், மேலசிங்கப்பெருமாள் ஆகிய மூர்த்திகளை பிரதிஷ்டை செய்தனர் என்றும் இந்த ஆலயங்களுக்கு கி. பி. 1779 அக்டோபர் மாதம் குடமுழுக்கு நடைப்பெற்ற தாக அறியமுடிகிறது.

---

*தஞ்சை மராட்டிய மன்னர் கால அரசியலும், சமுதாய வாழ்க்கையும். (பக்கம்—190—37)

‡தஞ்சை மராட்டிய மன்னர் கால அரசியலும், சமுதாய வாழ்க்கையும். (பக்கம்—190)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இத் திருப்பணியை நிறைவேற்றியவர் இரண்டாம் துளஜா (1765–1787) மன்னர் என்று கருதலாம்.

சுவடியின் வரலாறு :

இந்த தஞ்சபுரி மாகாத்மியம் என்னும் நூல் இந் நூலகத்தில் 1) B.No. 1836 D.No. 10480 2) B.No. 11197 D. No. 10481 இரண்டு சுவடிகள் உள்ளன. ஒன்று தேவநாகரி லிபியில் அமைந்த காகிதச்சுவடியும், ஒன்று தெலுங்கு எழுத்தில் அமைந்த ஓலைச்சுவடியும் ஆகும். (இதில் காகிதச் சுவடியில் தஞ்சபுரிமாஹாத்மியம் என்றும், ஓலைச்சுவடியில் தஞ்சபுரி விஷ்ணுஸ்தல மாஹாத்மியம்' என்றும் எழுதப்பட்டுள்ளது). இவ்விரண்டு சுவடிகளிலும், தெலுங்குச் சுவடியே (ஓலை) காலத்தால் முந்தியது அதன் பிரதியே காகிதச் சுவடி என்றும் சொல்லலாம்.

ஆனால் ஓலைச்சுவடியில் முழு வரலாறும் இல்லை. எனவே இப்பதிப்புக்கு எடுத்துக்கொண்ட சுவடி முழுமையும் உள்ள காகிதச் சுவடியாகும். எனவே காகிதச்சுவடியில் உள்ள 'தஞ்சபுரி மாகாத்மியம்' என்ற தலைப்பே இங்குக் கொடுக்கப்பட்டு 'விஷ்ணுஸ்தலம்' என்றதனை அடைப்புக் குறிகளில் கொடுத்துள்ளேன்.

*'தஞ்சபுரிமாகாத்மியம்' என்ற பெயரில் மராத்தி மொழிப் பிரிவிலும் சுவடிகள் காணப்படுகின்றன. ஆனால் இந்தச் சுவடிக்கும், தற்போது வெளிவரும் இந்த நூலுக்கும் வேறுபாடுகள் உண்டு. மராத்திமொழி நூல் 16 சோழ மன்னர்களின் சைவத்தொண்டுகளைப் பற்றிக் கூறுவது. † இது 'பிருகதீஸ்வரமாஹாத்மியம்' என்னும் சம்ஸ்கிருத

---

*சரசுவதி மகால் வெளியீடு :
பதிப்பாசிரியர் திரு. T.R. பீமராவ் அவர்கள், மராத்தி பண்டிட்.

†சரசுவதி மகால் வெளியீடு :

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

நூலின் மொழியாக்கம் என்பதும், இந்த நூல் அமரசிம்மன் (1788—1799) காலத்தில் சேஷகவியால் மொழியாக்கம் செய்யப்பெற்றது என்பதையும் அறியலாம்.

ஆனால் தற்போது வெளிவரும் தஞ்சாபுரிமாகாத்மியம் விஷ்ணுத் தலங்களைப்பற்றியே, கூறுவதாகும், குறிப்பாக வெண்ணாற்றங்கரையில் எழுந்தருளியுள்ள விஷ்ணுமூர்த்திகளின் சிறப்பைக் கூறுவது என்பதுடன் வெண்ணாற்றங்கரையின் தலபுராணம் என்னும் சிறப்பையும் அடைகிறது.

நன்றியுரை :—

இத்தகு சிறப்பு வாய்ந்த இந்நூலைப் பதிப்பிக்கும் பணியினை எனக்களித்த எமது மகால் முன்னாள் இயக்குனரும் மாவட்ட ஆட்சியருமாகிய திருமதி சோசம்மா, இ. ஆ. ப. அவர்களுக்கும், இதற்கு அணிந்துரை நல்கிய இந்நாள் இயக்குனரும் மாவட்ட ஆட்சியருமாகிய திரு. து.இரா. ராமசாமி இ.ஆ.ப. அவர்களுக்கும், இம்மகால் நிருவாக அதிகாரி திரு அ. பஞ்சநாதன், M. A. B. Lib. Sc. அவர்கட்கும் நூல்நிலைய அச்சுப்பிரிவிலுள்ளவரனைவருக்கும் என் நன்றியைத் தெரிவித்துக்கொள்கிறேன்.

இந்நூலில் சிறியேனின் சிற்றறிவினால் ஏற்பட்ட பிழைகளைப் பொறுத்தருள வேண்டுகிறேன். பிழைகள் திருத்தம் பெற உதவினால் நன்றிக்கடப்பாடுடையேனாவேன். எனவே குற்றம் நீங்கி குணத்தினைக் கோடல் வேண்டுகிறேன்.

இங்ஙனம்,

எஸ். இராஜலக்ஷ்மி,
ஸம்ஸ்கிருதப் பண்டிதர்
சரஸ்வதி மஹால் நூலகம், தஞ்சாவூர்.

தஞ்சாவூர்,
6—2—86

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्रीः ॥

॥ तञ्जापुरीमाहात्म्यम् ॥

(विष्णुस्थलम्)

श्रीगणेशाय नमः ॥

अतसीपुष्पसंकाशं तुलसीदामभूषितम् ।
नीलमेघमुदाराङ्गं श्रीमहीसेवितं भजे ॥

साक्षात्कृत्वा पराशरस्य तपसा पद्मा तटित्ज्ज्योतिषां
भूत्वा नीलवलाहद्युति पयः पीत्वाऽमृतं सारसम् ।
हत्वा तञ्जकदण्डकप्रभृतिकान् यः पाति लोकत्रयम्
तं तञ्जापुरवासिनं कमलया श्रीनारसिंहं भजे ॥

अथ वक्ष्यामि माहात्म्यं तञ्जापुर्या विशेषतः ।
पराशरतपः सिद्ध्यै प्रसन्नो यत्र केशवः ॥

वधार्थं तञ्जकादीनां त्राणाय जगतामपि ।
यत्र प्रादुरभूद्विष्णुर्नीलमेघनिभः स्वयम् ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नीलमेघस्य सान्निध्यकारणं च मुनेः कृते ।
वधश्च तञ्जकादीनां संक्षेपेणोच्यते मया ॥

कावेर्या दक्षिणे भागे प्रवृत्ता योजनान्तरे ।
मणिमुक्तानदी नाम पातालतलवाहिनी ॥

तस्यामेव महानासीद्देवखातोऽम्हदोवरः ।
संजुष्टपुण्यतरुभिः पुण्यपुष्पोपशोभितः ॥

सेयं पुष्करिणी पुण्यसलिला लोकपावनी ।
स्थानं तत्पावनं प्रोक्तं समंताद्योजनावधि ॥

सेयं तञ्जापुरी नाम प्रसिद्धा सर्वदिक्ष्वपि ।
विष्णुना कल्पिता नाम तत्कारणमिहोच्यते ॥

तपस्थलमिदं प्राप कदाचिन्मुनिपुङ्गवः ।
दिष्ट्या पराशरमुनिर्विचिन्वन्तपसस्थलम् ॥

स दृष्ट्वानुत्तमं देशं हृद्यं पुण्यविवर्धनम् ।
सलिलं पुष्करिण्याश्च प्रफुल्लकमलोल्बणम् ॥

रम्यां पुण्यतरूच्छायां मणिमुक्तानदीमपि ।
प्रहर्षमतुलं लेभे तस्थौ विस्मितमानसः ॥

तपः कर्तुं स्थलमिदं पुण्यं रम्यं ममोचितम् ।
इति निश्चित्य सततं वासं चक्रे महामुनिः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

उटजेषु च रम्येषु कृतेषु मुनिपुङ्गवः ।
शिष्यैश्च मुनिभिस्सार्धमुवास तपसान्वितः ॥

स्वाध्यायैर्वेदपाठैश्च होमदानजपादिभिः ।
शास्त्रोपन्यासपाठैश्च ध्यानयोगैस्समाधिभिः ॥

कुर्वन्तिस्म तपोयोगं यथाकालं तपोधनाः ।
अन्वितस्तैर्मुनिवरश्चचारविपुलं तपः ॥

ततो देवासुरैस्सार्धं पयोधिममृतार्थिभिः ।
मन्थानं मन्दरं कृत्वा ममन्थ पुरुषोत्तमः ॥

ततस्तु कौस्तुभो लक्ष्मीः संतानाद्यास्समुत्थिताः ।
यत्नेन महता पश्चादमृतं संबभूव ह ॥

तदादायामृतंदिव्यं दैत्यारिर्भगवान्हरिः ।
व्यभजत्सर्वदेवानां मुनीनां च दिवौकसाम् ॥

स तत्र मुनिशार्दूलः पराशरमुनिस्तदा ।
समवायं सुराणां तं ययौ मपिसतं भवेत् ॥

क्षुत्पिपासाभयैर्मुक्ता मदीयाश्रमवासिनः ।
पुष्टाश्चौषधयो गावो न शुष्यंन्ति जलं सदा ॥

सर्वोपकाररहितं न युक्तं मम भोजनम् ।
इति मत्वामृतं सम्यक् गुप्तं संरक्ष्य निर्ययौ ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भूलोकाभिमुखं यान्तं तं दृष्ट्वामृतधारिणम् ।
सुत्रामा सहसा गम्य प्रत्युवाच मुनीश्वरम् ॥

भगवन्नमृतं हृत्वा कथं गच्छसि भूतलम् ।
असुरा राक्षसाश्चैव सुधाकांक्षिण एव ते ॥

हरेयुरमृतं दिव्यं हरादपि मदोद्धताः ।
आमृष्टं भूतलं तैस्तत् कथं वानेतुमिच्छसि ॥

इत्युक्तो मुनिशार्दूलं प्रत्युवाच सुरेश्वरम् ।
मघवन्नमृतं प्राप्तं ममैकस्य कृते मया ॥

प्रयोजनाय सर्वेषां ममाश्रमनिवासिनाम् ।
अमृतं प्रार्थितं दिव्यमनुमन्तुमिहार्हसि ॥

ममाश्रमे पुष्करिणी मणिमुक्तानदी भवा ।
तस्यां निक्षिप्तममृतं यदिलोकोपकारकम् ॥

विशेषादाश्रमस्थानामृषीणांपशुपक्षिणाम् ।
क्षुत्पिपासामयघ्नस्यादमृतांबु सनातनम् ॥

वनं च फलमूलाढयं समृद्धं स्यात्पयो गवाम् ।
गतक्लमाश्च हृष्टाश्च तपः कुर्युस्तपोधनाः ॥

एवं सर्वोपकाराणां क्षममत्यन्तदुर्लभम् ।
अहमेकः कथं भोक्तुमिच्छाम्यतिथिशून्यवत् ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

आमृश्य तेऽथरक्षोभिरितिमैवं व्यथां कृथाः ।
मया गुप्तं हि यत्नेन हुतशेषामृतं यथा ॥

इत्युदीरीतमाकर्ण्य मुनेराखण्डलो वचः ।
पुनरप्यब्रवीदेतत् महर्षे श्रूयतामिति ॥

क्षुत्पिपासाजरामृत्युगदघ्नं गुलिकामृतम् ।
दुर्लभं प्राप्य हस्तस्थं भोक्तुं नेच्छति को भवान् ॥

मृष्टमन्नं जलं मूलं फलं वासोधनं महत् ।
अन्यच्च दीयतेर्थिभ्योऽतिथिभ्यो न मृषा क्वचित् ॥

तस्माद्भुक्तामृतं प्राप्तममृतत्वमिहार्हसि ।
कर्ता परोपकाराणां तपःकर्तुं सनातनम् ॥

इत्येतद्वचनं श्रुत्वा प्रत्यवोचत्पराशरः ।
परार्थे यादृशी प्रीतिरात्मार्थे सा न विद्यते ॥

परेषु वा स्वात्मनि वा को भेदस्समदर्शिनाम् ।
बहुना किं भिन्नरुचिः खलु लोकः पुरन्दर ॥

ममैषोऽध्यवसायोऽभूत्तिष्ठगच्छ त्रिविष्टपम् ।
गच्छामि चाहं देवेन्द्रे त्युक्त्वाऽगच्छन्मुनीश्वरः ॥

कृतनिश्चयमेवैनं विदित्वा पाकशासनः ।
कल्पयन्विविधान्विघ्नान्ययौ नाकं सुरैस्सह ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मुनिश्च नित्यं सन्नद्धममृतं घृतमानसः ।
रक्षाकरान्महामन्त्रान् जप्त्वा तूर्णं ययौ तदा ॥

अथ सुखरमायाकल्पितानंतरायान्
विषपवनककार्यान् न्यासरूपान्महोग्रान् ।
हरिपददृढभक्तिध्यानयोगैर्मुनीन्द्रो
जननकरणसंगान् योगिवत्सन्ततार ॥

॥ इति ब्रह्माण्डपुराणे अगस्त्यनारदसंवादे श्रीमत्तंजापुरीमाहात्म्ये प्रथमोध्यायः ॥

॥ अथ द्वितीयोऽध्यायः ॥

सतीर्त्वा तपसः शक्त्या मार्गमावृत्य तिष्ठतः ।
प्रत्युहान्परमप्रीतः स्वाश्रमं सन्ददर्श ह ॥

पराशरं तमायान्तमालोक्याश्रमवासिनः ।
ऋषयश्शिष्यसहिताः प्रत्युज्जग्मुर्मुदान्विताः ॥

ऋषिश्च ऋषयश्चैव वियोगप्रभवां व्यथाम् ।
त्यक्त्वा दर्शनजां प्रीतिमन्योन्यमभजन्पराम् ॥

तेऽभिनन्द्य महात्मानं यथार्हमनुमान्य च ।
पुरस्कृत्य मुनिश्रेष्ठमाश्रमं प्राविशंस्तदा ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रविश्याश्रममासीनमृषयः प्रीतमानसाः ।
शशंसुः कुशलप्रश्नमृषिं स्वागतपूर्वकम् ॥

अपृच्छत्कुशलं तांस्तान् प्रत्येकमनुमान्य च ।
मुनिश्च परमोदारो वृत्तान्तं व्याजहार सः ॥

संसिद्धिममृतस्यास्य वचनं तद्विडौजसः ।
अन्तरायांश्च तानुक्त्वा पुनश्चेदमथाब्रवीत् ॥

शृणुध्वमृषयस्सर्वे भवदर्थमिहामृतम् ।
आनीतमत्नयत्नेन कथं वा भोक्तुमिच्छथ ॥

अङ्गीकृत्यामृतं भोक्तुमपर्याप्तममतंस्त्विह ।
पुण्ये सरसि निक्षिप्योपयोक्तुं च किमिच्छथ ॥

इत्युक्तं वचनं श्रुत्वा मुनेस्तदमृतोपमम् ।
ऋषयः परमप्रीताः प्रत्यूचुरभिनन्द्य तम् ॥

साधु साधु महाप्राज्ञ भवच्चरितमद्भुतम् ।
प्रवृत्तिर्महतां लोके परार्थैव च यद्यपि ॥

भवता दुर्लभं प्राप्तं तत्परार्थाय दीयते ।
यत्नेन महताप्येव मुपकर्ता न विद्यते ॥

भवन्तं भवतां लोके का सिद्धिर्दुर्लभा भवेत् ।
यदिष्टं भवतः प्रीत्या तथैव क्रियतां मुने ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

इत्युक्तवत्सु सर्वेषु तपस्विषु महामुनिः ।
आदायामृतमन्हाय पुण्ये निक्षिप्तवान्ह्रदे ॥

मुनेः प्रभावादमृतरसोऽव्ययथाऽखिलं जलम् ।
समन्तादमृत भूत्वापुष्पगन्ध इव स्थितः ॥

सोऽस्य पुष्करणीत्याख्या चकारामृतपूर्विकाम् ।
अमृतं निहितं यस्माज्जलं तदमृतोपमम् ॥

सरस्तदाप्रभृत्येवामृत पुष्करिणीति च ।
प्रथितं त्रिपुलोकेषु पावनं तीर्थमुच्यते ॥

स्नात्वा जलाशये तस्मिन् पीत्वाचांबु सुधामयम् ।
निरामया सदा तृप्तास्तपश्चक्रुस्तपोधनाः ॥

पराशरः प्रसन्नात्मा स्नात्वा पीत्वामृतांबुवत् ।
तत्र केशवमाराध्य तपःकुर्वनु वासस: ॥

अमृतांबुकणस्पृष्टपवनैर्वर्धितद्रुमम् ।
तपोवनं श्रियाजुष्टं योजनद्वय संमितम् ॥

तरवः पुष्पितास्तत्र सुदाऽरुणपल्लवाः ।
फलिनश्च तदा सर्वे लताः कुसुमितास्तदा ॥

स्वकीयं कालमुत्सृज्य ऋतवः षटसमन्विताः ।
वसन्तस्स तदा प्रीत्या तपोवनमनुत्तमम् ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पशवश्च तदा गावो बहुपल्लववृत्तयः ।
पुष्टाश्च सुदुधाश्चैव वसन्तिस्म तपोवने ॥

अन्योन्यं वैरमुत्सृज्य मृगाव्याघ्रादयस्तदा ।
पक्षिणश्च तपोनिष्ठा इवावर्धन्त तद्वने ॥

अमृतांबु समाश्रित्य वातो यत्र प्रवर्तते ।
तद्देशोऽपि समृद्धोभूत् किमुतद्देशसौष्टवम् ॥

सुश्लिष्टशीतलच्छायं तपोवनमुपेत्य तत् ।
मनोरमतया देवाः सिद्धाश्च न्यवसन् सदा ॥

समागतानां सर्वेषां श्रमच्छिदमृतांबुभिः ।
शाकमूलफलैः सस्यैः समृद्धैश्चान्यवस्तुभिः ॥

सर्वोपकारक्षमतां संप्राप्तः सुतरां बभौ ।
अद्वितीयोपितन्मूर्त्याः सद्वितीय इवाश्रमः ॥

सा च पुष्करिणी रेजे कल्हारकुमुदोत्पलैः ।
सुधातरङ्ग संपृक्तैर्मण्डिता कमलैः सदा ॥

हंसैश्च चक्रवाकैश्च कारण्डैर्भ्रमरैः सदा ।
सेवितं दग्धसदृशैः पयोभिरभिवर्धिता ॥

एवं विभ्रानिमानेऽस्मिन् आश्रमे मुनिसत्तमः ।
सनिर्विघ्नं तपोयोगं चाप्युवास चिरं तदा ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ततः प्रवर्तिते घोरे दुर्भिक्षे द्वादशाब्दिके ।
रोहिणीशकटं भित्वा मन्दे याते महात्मनि ॥

ग्रहाणामति वक्रोभूद्देवासुर भयङ्करः ।
अनावृष्टि निदानंत दभूज्जगति दारुणम् ॥

तस्मिन्ननावृष्टिभत्रे प्रवृत्ते लोकसंक्षये ।
सागराश्शोषिता नद्यो ह्रदाः सिकतशेषिताः ॥

जलाशयाश्चागाधाश्च पांसुशेषास्तदाऽभवन् ।
वृक्षाश्चौषधयश्चैव शुष्काः पर्णविवर्जिताः ॥

प्राणिनां दुर्लभं भूमौ पानीयं भोज्यवस्तु वा ।
शाकमूलफलादीनि दुर्लभानि तदाऽभवन् ॥

तदैवं व्यथिते लोकेप्यनावृष्टिभयेन तत् ।
व्यथितं नाभवद्दिव्याऽमृत योगान्मुनेस्थितम् ॥

तद्दिव्यामृत संपर्कात्पुष्करिण्या जलं तदा ।
अनावृष्टयामपि सदा कूलंकषमिवाऽभवत् ॥

ऋषयः साधवोप्यन्ये जना दुर्भिक्षपीडिताः ।
अभिजग्मुर्निदाघार्ताः प्रपामिव तमाश्रमम् ॥

सकलजन शरण्यं क्षुत्पिपासाभयघ्नम्
मुनिवर वन मारात् स्वादुपीयूषतोयम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अधिगत फलमूलं सस्यजातैस्समृद्धम्

वटदलगतमापु र्वैष्णवं तद्यथां ते ॥

इति श्री ब्रह्माण्डपुराणे अगस्त्यनारदसंवादे तञ्जापुरी माहात्म्ये

॥ द्वितीयोऽध्यायः ॥

॥ अथ तृतीयोऽध्यायः ॥

अथ दुर्भिक्षपीडार्तान् जनान्तानागतानृषीन् ।

पराशरः प्रहृष्टात्मा प्रत्युवाचानुमान्य च ॥

आस्वाद्य फलमूलादीन् पीत्वाचांबु सुधामयम् ।

अत्रोपविशतान्योन्यं साधुवृत्ता यथासुखम् ॥

इति प्रशस्य तान् सर्वानृषीन्संपूज्यचागतान् ।

मुनिर्विश्वकुटुंबीवाध्युवासात्रानुपालयन् ॥

अथ चेरूर्निदाघार्ताः शाल्मलीद्वीपवासिनः ।

सदाराः ससुता भूमावसुराश्चाश्रमोन्मुखाः ॥

तञ्जको दण्डकश्चेति तारकश्चेति विश्रुताः ।

महावीरा महेष्वासाः सभृत्यबलवाहनाः ॥

पृथिव्यां सञ्चरन्तस्ते क्षुत्पिपासासमन्विताः ।

दूराद्ददृशुस्ते यायामानन्तं तपोवनम् ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ते जलाशयबुध्या तदभिजग्मुस्स्वरान्विताः ।
तदेत्यचैवददृशुः पराशरतपोवनम् ॥

प्रहृष्टजनसंकीर्णं फलमूलोप शोभितम् ।
स्वादुपानीयसंयुक्तं दृष्ट्वा ते विस्मयं गताः ॥

अत्यद्भुतमिदं मत्वा पीत्वा चांबु रसोत्तरम् ।
भुक्त्वा फलानि ते चक्रुस्तत्रावासं मदोद्धताः ॥

ततस्तपोवनान्याशु दूषयन्तिस्म ते भृशम् ।
बाधन्तेस्म जनान्सर्वान् आश्रमांश्च तपोधनान् ॥

मुनिः पराशरशिष्यैर्ऋषिभिश्च समन्वितः ।
तानास्याद्य ततोवाच गिरा मधुरया पुनः ॥

मदीयमाश्रमगिदं सेवितं साधुभिर्जनैः ।
पवित्रमृषिभिर्जुष्टं बाधध्वं किं महाबलाः ॥

वयं मान्या हि भवता मृषयस्तपसिस्थिताः ।
रक्षणीया महावीरैर्नित्यमाश्रमवासिनः ॥

संरक्षणं हि साधूनां परमो धर्म उच्यते ।
परोपकारसदृशो धर्मो नास्ति न संशयः ॥

तथैव परहिंसाभिस्तुल्यं पापं न विद्यते ।
सुखस्य कारणं धर्मं पापं दुःखस्य कारणम् ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तस्मात्परेषां कर्तव्या नैव हिंसा सुखार्थिभिः ।
हिंसां कृत्वा कथं यूयं दुःखं भोक्तुं समाहिताः ॥

तपोवने तपोयुक्ता वीतराग वसन्त्यतः ।
सर्वं सैन्यैर्महावीरास्तद्गच्छध्वमतोऽन्यतः ॥

इत्येतद्वचनं धर्म्यं मुनेः श्रुत्वा मदोद्धताः ।
भर्त्सयन्तिस्म दुर्वृत्ता नश्यतां मतिरीदृशी ॥

दुर्वृत्तास्तान् मुनिर्ज्ञात्वा स्वाश्रमं संप्रविश्य च ।
किं कर्तव्यमिति स्मृत्वा चिन्तयन्स्तु समाहितः ॥

ध्यात्वा चतुर्मुखं देवं ब्रह्माणं कमलासनम् ।
मनसा शिरसा चैव तुष्टाव परमेष्ठिनम् ॥

नमः कमलपत्राक्ष नमस्ते विश्वतोमुख ।
विधात्रे सर्वभूतानां पितामह नमोऽस्तुते ॥

नमो हिरण्य गर्भाय परायात्मभुवे नमः ।
परंज्योतिस्वरूपाय निर्गुणाय गुणात्मने ॥

त्वया सृष्टमिदं विश्वमनन्तं सचराचरम् ।
अनेककोटि ब्रह्माण्डसहितं चार्णवैः सह ॥

अप्रमेमानु भावस्त्वं प्रभावं वेत्तिकस्तव ।
आदिस्त्वं सर्वदेवानां वेदानां प्रभवोभवान् ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सर्वभूतान्तरस्थाय सर्वभूतात्मने नमः ।
प्रसीद कृपया देव त्राहि नः शरणं भवान् ॥

स्तुतस्तुतिभिरित्येवमृषीणां चतुराननः ।
प्रादुरासीन्मुनेरग्रे विधाता हंसवाहनः ॥

दृष्ट्वा मुनिर्विधातारं प्रणम्य परया मुदा ।
अर्घ्याद्यैः पूजयामास शशंस च मनोरथम् ॥

समाश्रमोयं भगवन्न सुरैस्तञ्जकादिभि. ।
बाध्यते नितरां खिन्ना ऋषयस्साधवस्तथा ॥

एते हिंसन्ति दुर्वृत्ता ऋषीसाधु जनान्तथा ।
कर्तव्यो भवताह्यद्येषां प्रतिकारो दुरात्मनाम् ॥

इत्येतद्वचनं श्रुत्वा प्रत्युवाच पितामहः ।
तं तथा न वधं जाने तञ्जकादीन्महाबलान् ॥

सर्वेषां सृष्टि कर्ताहं न हन्ताहं कदाचन ।
स्वयं संवर्ध्य संहर्तुं नेच्छेयं तर्हि कंचन ॥

किंतु प्रथममीशानमभ्यर्थय महामुने ।
उपाये नैव वध्यास्ते विष्णुनाह्यन्यदुर्जयाः ॥

इत्युक्त्वा देवदेवश्च तत्रैवान्तरधीयत ।
मुनिश्चेशान मभ्यर्च्य ध्यात्वा स्तोत्रमुवाच सः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नमोऽस्तु नीलकण्ठाय श्रीकण्ठाय पिनाकिने ।
त्रियंबकाय देवाय त्रिपुरघ्न नमोऽस्तुते ॥

नमो भवाय भीमाय भूतनाथ नमोऽस्तुते ।
नमः प्रमथनाथाय नमो दैत्य प्रमाथिने ॥

नमस्ते शूलहस्ताय नमो वृषभवाहन ।
अष्टमूर्ते नमस्तुभ्य मष्टैश्वर्य प्रदायिने ॥

नमस्ते भस्मदिग्धाङ्गनागाभरणधारिणे ।
नमश्चन्द्रांशु संभिन्न मौलिरत्नांशुमण्डित ॥

नमः सुरसरिन्मालास्वलंकृत जटाधर ।
नमो गौरीपते तुभ्यं सर्वलोकैक नायक ॥

अचिन्त्याव्यक्तरूपाय नित्याय परमात्मने ।
सदाशिवाय शान्ताय भक्तानामभयङ्कर ॥

दयानिधे नमस्तुभ्यं प्रसीद परमेश्वर ।

इति मुनिवचनं निशम्य गौरी
पतिरपि सर्वजनान्तरात्मवर्ती ।
रजतगिरिसमानरूपमारात्
वृष मधिरुह्य मुनेस्तदाविरासीत् ॥

इति श्री ब्रह्माण्डपुराणे अगस्त्यनारदसंवादे तञ्जापुरीमाहात्म्ये

॥ तृतीयोऽध्यायः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ अथ चतुर्थोऽध्यायः ॥

तं दृष्ट्वा मुनिरीशानं देवमद्भुतदर्शनम् ।
समभ्यर्च्याब्रवीच्चैनं भूयो भूयः प्रणम्य च ॥

संदर्शितं हि भवता भक्तवात्सल्यमीश्वरः ।
सुरेन्द्राणामपि भवद्दर्शनं दुर्लभं हि यत् ॥

भवद्दर्शनमात्रेण धन्योऽस्मि विगतज्वरः ।
किंत्वाश्रमे मदीयेस्मिन्निवसति सुरारयः ॥

तक्षको दण्डकश्चेति तारकश्चेति नामतः ।
स भृत्यबन्धु वाहास्ते बाधन्ते नितरां प्रभो ॥

कुर्वन्तिस्म तपोविघ्नं दूषयन्ति तपस्थलम् ।
ऋषीन्साधूंश्च हिं सन्ति ते हंतव्यास्त्वया प्रभो ॥

इति तद्वचनं श्रुत्वा मुनेः स परमेश्वरः ।
कृपानिधिः प्रसन्नात्मा प्रत्युवाच तपोधनम् ॥

तक्षकाद्या सुरावीरा ममावध्या वरान्विताः ।
अवध्यास्ते विष्णुनाचापि नियोक्ष्व चण्डिकां मुने ॥

तया निर्वर्तयाऽभीष्टमप्रमेयानु भावया ।
इत्युक्त्वा परमेशानस्तत्रैवान्तरधीयत ॥

ततः प्रादूरभूत्सापि मातृतेजोंऽश सम्भवा ।
काली करालवदना भीषणा शूलधारिणी ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नानारूपधरा नानाविधदिव्यायुधान्विता ।
दृष्ट्वा करालवदना महोत्साह बलान्विता ॥

सर्वाभरणसंयुक्ता नियुक्ता शूलपाणिना ।
मुनेः समीपमभ्येत्य साब्रवीच्छुभया गिरा ॥

अत्रेन्नियुक्तकर्माणि कर्तुमीश्वरचोदिता ।
समागताहं कर्तव्ये नियोजय महामुने ॥

इत्युक्तवतिं रौद्राभां रौद्रीं दृष्ट्वा महामुनिः ।
यथाविध्युपचारैस्तां पूजयामास सुव्रतः ॥

पूजितां सुप्रसन्नां तामप्रमेयपराक्रमाम् ।
स्वागताद्यै श्शुभैर्वाक्यैरनुमान्याब्रवीन्मुनिः ॥

साधुदेवि महाभागे तवागमनमुत्तमम् ।
साधु संरक्षणार्थाय प्रवृत्तिर्महतां खलु ॥

तपोवनस्य रक्षार्थं निवासं कुरु शोभने ।
त्वदधीनमिदं रम्यं पवित्रं मत्तपोवनम् ॥

परिपालय साधूंश्च तपोधनकुलं तथा ।
सौम्यरूपतया देवि साधुसंरक्षणं कुरू ॥

हिंसन्ति ये साधुजनान् तज्ञकाद्यास्सुरद्विषः ।
तान्निवारय दुर्वृत्तान् विद्रावय महास्त्रैः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हिंसन्ति चाद्य सुतरां तञ्चकायास्सुरद्विषः ।
तेषां निरसनं कार्यं सर्वथापि प्रयत्नतः ॥

यदातेयोद्धुमिच्छन्ति दर्पेणक्रूरनिश्चयाः ।
असुरानिर्दयत्वेनहन्तव्यास्ते तदात्वया ॥

इत्येवं मुनिशार्दूलः कालीं प्रयुयुजे ततः ।
सा तथेति प्रतिज्ञाय ययौ चास्य तपोवनम् ॥

सा पश्यन्ति सुधायोगात् यदा तरुणपल्लवम् ।
तपोवनं श्रियाजुष्टं संचचार मनोहरम् ॥

संवीक्ष्य सरसश्शोभां सदापुष्पफलोद्गमम् ।
वनंसुरभिसुच्छायं परंहर्षमवापसा ॥

संचरन्तिज्वलंन्ती सा वने तस्मिन्नितस्ततः ।
ददर्शासुरयूथं तदविनीतं मदोद्धतम् ॥

अदिष्टानपितैःसत्वान् छिद्यमानान्मुहुर्मुहुः ।
पीडयमानान्मुनीन्साधून् जनान्निरपराधिनः ॥

भग्नांश्च शाखिनः पुष्पफलाहरणहेतुना ।
दृष्ट्वा तानतिदुर्वृत्तान् सा चुकोप भृशं तदा ॥

द्रुतं समेत्य सा काली भीष्णायुधविक्रमान् ।
भर्त्सयामास हुंकारैर्व्याज़हारच तान् प्रति ॥

CC-0. Saraswati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तपोवनमिदं शम्भोर्नियोगाद्रक्ष्यते मया ।
तस्माद्गच्छध्वमसुरा यदि जीवितुमिच्छथ ॥

इत्येतद्वचनं श्रुत्वा भर्त्सितास्ते सुरारयः ।
तञ्चकाद्यास्समासाद्य कालीं वचनमूचिरे ॥

श्रुत्वा देव्युदितं वाक्यं क्रुद्धास्संरक्तलोचनाः ।
अट्टहासं ततः कृत्वा प्रत्यूचुः परूषं तदा ॥

स्त्रियन्तां प्रति ते दैत्या वक्तुं तद्वाक्यमागताः ।
हा हेति भर्त्सयामासुः परुषं घोरनिस्वनाः ॥

सेनाधिपान्समाहूय प्रेषयामास तञ्चकः ।
तस्यावधार्थमसुरान् सभृत्यबलवाहनान् ॥

ते च प्रचक्रमुर्घोरं पटहस्वनगर्जिताः ।
कालमेघनिभाश्चास्त्र वर्षेणोत्कट विद्युताः ॥

आगतान्कलानन्दृष्ट्वा काली दिव्यायुधान्विता ।
गर्जयामास युद्धार्थं, सा कृत्वाऽशेषनिस्वनम् ॥

दृष्ट्वा तां महतीं सेनां श्रुत्वा तद्गर्जितं पुनः ।
काली करालवदना साट्टहासमुवाचह ॥

किमर्थं मदगर्वेण शरीरं त्यक्तुमिच्छथ ।
एतद्वारयुधं सर्वान् युष्मान् भोक्तुमिहेच्छति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

इत्येतद्वचनंश्रुत्वा दैत्यास्ते क्रोधमूर्च्छिता: ।
प्राहरन्विविधैरस्त्रै: शूलखड्गपरश्वधै: ॥

मुसलैर्भिण्डिपालैश्च शतघ्नीशक्तितोमरै: ।
कुन्तैश्चावकिरन्मेधाइववर्षैरधित्यकाम् ॥

सापनीयास्त्रवर्षाणि शरीरमवधूयच ।
खमुत्पतंत्यट्टहासं चकाराशनिदारुणम् ॥

ततश्चकार तुमुलं युद्धं तैर्भीषणायुधा ।
यावन्तीयुद्धरसिकास्तावतीर्ददृशे च सा ॥

यन्तारं हस्तिनासार्धं सादिनासहवाजिनम् ।
रथेन रथिनसेनां जघान सहसैकदा ॥

संघातसंयुगे तस्मिन् द्वन्द्वयुद्धमपीच्छताम् ।
युगपद्द्वन्द्वयुद्धं च ययौ सान्तिकमञ्जसा ॥

ये च माया प्रभावेन जेतुमैच्छन्सुरद्विष: ।
तेषां मायामतीत्यैतान् जघान निजौजसा ॥

अभ्यर्थ्यंति न पुन: यथा साप्यर्थिनां ददौ ।
तथापि विमुखास्ते वा भवन् भग्नमनोरथा: ॥

एवं महति संग्रामे बले नश्यति रक्षसाम् ।
तञ्जकोपि ययौ क्रुद्धो दण्डकस्तारकस्तथा ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सममेत्यच तां देवीमुवाच परुषं वचः ।
ममाग्रवर्तिनो धीरा हतास्ते स्त्रीबलेन हि ॥

स्त्रीखल्वित्यवमत्याऽतां मदीया निहतास्त्वया ।
ममाग्रे युधि कस्तिष्ठेत् विना स्त्रीरूपया त्वया ॥

